# ॥ શ્રીગણેશમાનસપૂજા ॥

.. shrIgaNeshamAnasapUjA ..

sanskritdocuments.org

August 2, 2016

.. shrIgaNeshamAnasapUjA ..

# ॥ શ્રીગણેશમાનસપૂજા ॥

Document Information

Text title : gaNeshamAnasapUjA

File name : gaNeshamAnasapUjA.itx

Category : pUjA

Location : doc_ganesha

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : http://www.webdunia.com

Proofread by : Karthik Chandan.P : Amith K Nagaraj(amithkn at rediffmail.com)

Description-comments : mudgalapurANa

Latest update : March 9, 2004

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

sanskritdocuments.org

# ॥ શ્રીગણેશમાનસપૂજા ॥

શ્રી ગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ॥

વિઘ્નેશવીર્યાણિ વિચિત્રકાણિ બંદીજનૈર્માગધકૈઃ સ્મૃતાનિ ।
શ્રુત્વા સમુત્તિષ્ઠ ગજાનન ત્વં બ્રાહ્મે જગન્મંગલકં કુરુષ્વ ॥ ૧॥

એવં મયા પ્રાર્થિતો વિઘ્નરાજશ્ચિત્તેન ચોત્થાય બહિર્ગણેશઃ ।
તં નિર્ગતં વીક્ષ્ય નમન્તિ દેવાઃ શંભ્વાદયો યોગિમુખાસ્તથાઽહમ્ ॥ ૨॥

શૌચાદિકં તે પરિકલ્પયામિ હેરમ્બ વૈ દન્તવિશુદ્ધિમેવમ્ ।
વસ્ત્રેણ સમ્પ્રોક્ષ્ય મુખારવિન્દં દેવં સભાયાં વિનિવેશયામિ ॥ ૩ ॥

દ્વિજાદિસર્વૈરભિવન્દિતં ચ શુકાદિભિર્મોદ-સુમોદકાદ્યૈઃ ।
સંભાષ્ય ચાલોક્ય સમુત્થિતં તં સુમણ્ડપં કલ્પ્ય નિવેશયામિ ॥ ૪॥

રત્નૈઃ સુદીપ્તૈઃ પ્રતિબિમ્બિતં તં પશ્યામિ ચિત્તેન વિનાયકં ચ ।
તત્રાસનં રત્નસુવર્ણયુક્તં સંકલ્પ્ય દેવં વિનિવેશયામિ ॥ ૫॥

સિદ્ધ્યા ચ બુદ્ધ્યા સહ વિઘ્નરાજ! પાદ્યં કુરુ પ્રેમભરેણ સર્વૈઃ ।
સુવાસિતં નીરમથો ગૃહાણ ચિત્તેન દત્તં ચ સુખોષ્ણભાવમ્ ॥ ૬॥

તતઃ સુવસ્ત્રેણ ગણેશમાદૌ સમ્પ્રોક્ષ્ય દૂર્વાદિભિરર્ચયામિ ।
ચિત્તેન ભાવપ્રિય દીનબન્ધો મનો વિલીનં કુરુ તે પદાબ્જે ॥ ૭॥

કર્પૂરકૈલાદિ-સુવાસિતં તુ સુકલ્પિતં તોયમથો ગૃહાણ ।
આચમ્ય તેનૈવ ગજાનન! ત્વં કૃપાકટાક્ષેણ વિલોકયાશુ ॥ ૮॥

પ્રવાલ-મુક્તાફલ-હારકાદ્યૈઃ સુસંસ્કૃતં હ્યન્તરભાવકેન ।
અનર્ઘ્યમર્ઘ્યં સફલં કુરુષ્વ મયા પ્રદત્તં ગણરાજ ઢુણ્ઢે ॥ ૯॥

સૌગંધ્યયુક્તં મધુપર્કમાદ્યં સંકલ્પિતં ભાવયુતં ગૃહાણ ।
પુનસ્તથાઽઽચમ્ય વિનાયક ત્વં ભક્તાંશ્ચ ભક્તેશ સુરક્ષયાશુ ॥ ૧૦॥

સુવાસિતં ચંપક જાતિકાદ્યૈસ્તૈલં મયા કલ્પિતમેવ ઢુણ્ઢે ।
ગૃહાણ તેન પ્રવિમર્દયામિ સર્વાંગમેવં તવ સેવનાય ॥ ૧૧॥

તતઃ સુખોષ્ણેન જલેન ચાહમનેકતીર્થાહૃતકેન ઢુણ્ઢે ।
ચિત્તેન શુદ્ધેન ચ સ્નાપયામિ સ્નાનં મયા દત્તમથો ગૃહાણ ॥ ૧૨॥

તતઃ પયઃસ્નાનમચિન્ત્યભાવ ગૃહાણ તોયસ્ય તથા ગણેશ ।
પુનર્દધિસ્નાનમનામયત્વં ચિત્તેન દત્તં ચ જલસ્ય ચૈવ ॥ ૧૩ ॥

તતો ઘૃતસ્નાનમપારવન્દ્ય સુતીર્થજં વિઘ્નહર પ્રસીદ ।
ગૃહાણ ચિત્તેન સુકલ્પિતં તુ તતો મધુસ્નાનમથો જલસ્ય ॥ ૧૪॥

સુશર્કરાયુક્તમથો ગૃહાણ સ્નાનં મયા કલ્પિતમેવ ઢુણ્ઢે ।
તતો જલસ્નાનમઘાપહંતૃ વિઘ્નેશ માયાભ્રમં હિનિવારયાશુ ॥ ૧૫॥

સુયક્ષપંકં સ્તમથો ગૃહાણ સ્નાનં પરેશાધિપતે તતશ્ચ ।
કૌમણ્ડલીસંભવજં કુરુષ્વ વિશુદ્ધમેવં પરિકલ્પિતં તુ ॥ ૧૬॥

તતસ્તુ સૂક્તૈર્મનસા ગણેશં સમ્પૂજ્ય દૂર્વાદિભિરલ્પભાવૈઃ ।
અપારકૈર્મણ્ડલભૂતબ્રહ્મણસ્પત્યાદિકૈસ્તં હ્યભિષેચયામિ ॥ ૧૭॥

તતઃ સુવસ્ત્રેણ તુ પ્રોંછનં વૈ ગૃહાણ ચિત્તેન મયા સુકલ્પિતમ્ ।
તતો વિશુદ્ધેન જલેન ઢુણ્ઢે હ્યાચાન્તમેવં કુરુ વિઘ્નરાજ ॥ ૧૮॥

અગ્નૌ વિશુદ્ધે તુ ગૃહાણ વસ્ત્રે હ્યનર્ઘ્યમૌલ્યે મનસા મયા તે ।
દત્તે પરિચ્છાદ્ય નિજાત્મદેહં તાભ્યાં મયૂરેશ જનાંશ્ચ પાલય ॥ ૧૯॥

આચમ્ય વિઘ્નેશ પુનસ્તથૈવ ચિત્તેન દત્તં સુખમુત્તરીયમ્ ।
ગૃહાણ ભક્તપ્રતિપાલક ત્વં નમોઽથ તારકસંયુતં તુ ॥ ૨૦॥

યજ્ઞોપવીતં ત્રિગુણસ્વરૂપં સૌવર્ણમેવં હ્યહિનાથભૂતમ્ ।
ભાવેન દત્તં ગણનાથ તત્વં ગૃહાણ ભક્તોદ્ધૃતિકારણાય ॥ ૨૧॥

આચાન્તમેવં મનસા પ્રદત્તં કુરુષ્વ શુદ્ધેન જલેન ઢુણ્ઢે ।
પુનશ્ચ કૌમણ્ડલકેન પાહિ વિશ્વં પ્રભો ખેલકરં સદા તે ॥ ૨૨॥

ઉદ્યદ્દિનેશાભમથો ગૃહાણ સિન્દૂરકં તે મનસા પ્રદત્તમ્ ।
સર્વાંગસંલેપનમાદરાદ્વૈ કુરુષ્વ હેરમ્બ ચ તેન પૂર્ણમ્ ॥ ૨૩ ॥

સહસ્રશીર્ષં મનસા મયા ત્વં દત્તં કિરીટં તુ સુવર્ણજં વૈ ।
અનેકરત્નૈઃ ખચિતં ગૃહાણ બ્રહ્મેશ તે મસ્તકશોભનાય ॥ ૨૪॥

વિચિત્રરત્નૈઃ કનકેન ઢુણ્ઢે યુતાનિ ચિત્તેન મયા પરેશ ।
દત્તાનિ નાનાપદકુણ્ડલાનિ ગૃહાણ શૂર્પશ્રુતિભૂષણાય ॥ ૨૫॥

શુણ્ડાવિભૂષાર્થમનન્તખેલિન્ સુવર્ણજં કંચુકમાગૃહાણ ।
રત્નૈશ્ચ યુક્તં મનસા મયા, યદ્દત્તં પ્રભો
તત્સફલંકુરુષ્વ ॥ ૨૬॥

સુવર્ણરત્નૈશ્ચ યુતાનિ ઢુણ્ઢે સદૈકદન્તાભરણાનિ કલ્પ્ય ।
ગૃહાણ ચૂડાકૃતયે પરેશ દત્તાનિ દન્તસ્ય ચ શોભનાર્થમ્ ॥ ૨૭॥

રત્નૈઃ સુવર્ણેન કૃતાનિ તાનિ ગૃહાણ ચત્વારિ મયા પ્રકલ્પ્ય ।

સમ્ભૂષય ત્વં કટકાનિ નાથ ચતુર્ભુજેષુ હ્યજ વિઘ્નહારિન્ ॥ ૨૮॥

વિચિત્રરત્નૈઃ ખચિતં સુવર્ણસંભૂતકં ગૃહ્ય મયા પ્રદત્તમ્ ।
તથાંગુલીષ્વાંગુલિકં ગણેશ ચિત્તેન્ સંશોભય તત્પરેશ ॥ ૨૯॥

વિચિત્રરત્નૈઃ ખચિતાનિ ઢુણ્ઢે કેયૂરકાણિ હ્યથ કલ્પિતાનિ ।
સુવર્ણજાનિ પ્રથમાધિનાથ ગૃહાણ દત્તાનિ તુ બાહુષુ ત્વમ્ ॥ ૩૦॥

પ્રવાલ-મુક્તાફલ-રત્નજૈસ્ત્વં સુવર્ણસૂત્રૈશ્ચ ગૃહાણ કણ્ઠે ।
ચિત્તેન દત્તા વિવિધાશ્ચ માલા ઊરૂદરે સોભય વિઘ્નરાજ ॥ ૩૧॥

ચન્દ્રં લલાટે ગણનાથ પૂર્ણં વૃદ્ધિક્ષયાભ્યાં તુ વિહીનમાદ્યમ્ ।
સંશોભય ત્વં વરસંયુતં તે ભક્તિપ્રિયત્વં પ્રકટીકુરુષ્વ ॥ ૩૨॥

ચિંતામણિં ચિંતિતદં પરેશ હૃદ્દેશગં જ્યોતિર્મયં કુરુષ્વ ।
મણિં સદાનન્દસુખપ્રદં ચ વિઘ્નેશ દીનાર્થદ પાલયસ્વ ॥ ૩૩॥

નાભૌ ફણીશં ચ સહસ્રશીર્ષં સંવેષ્ટનેનૈવ ગણાધિનાથ ।
ભક્તં સુભૂષં કુરુ ભૂષણેન વરપ્રદાનં સફલં પરેશ ॥ ૩૪॥

કટીતટે રત્નસુવર્ણયુક્તાં કાંચીં સુચિત્તેન ચ ધારયામિ ।
વિઘ્નેશ જ્યોતિર્ગણદીપનીં તે પ્રસીદ ભક્તં કુરુ માં દયાબ્ધે ॥ ૩૫॥

હેરમ્બ તે રત્નસુવર્ણયુક્તે સુનૂપુરે મંજિરકે તથૈવ ।
સુકિંકિણીનાદયુતે સુબુદ્ધ્યા સુપાદયોઃ શોભય મે પ્રદત્તે ॥ ૩૬॥

ઇત્યાદિ-નાનાવિધ-ભૂષણાનિ તવેચ્છયા માનસકલ્પિતાનિ ।
સમ્ભૂષયામ્યેવ ત્વદંકેષુ વિચિત્રધાતુપ્રભવાણિ ઢુણ્ઢે ॥ ૩૭॥

સુચન્દનં રક્તમમોઘવીર્યં સુઘર્ષિતં હ્યષ્ટકગન્ધમુખ્યૈઃ ।
યુક્તં મયા કલ્પિતમેકદન્ત ગૃહાણ તે ત્વંગવિલેપનાર્થમ્ ॥ ૩૮॥

લિપ્તેષુ વૈચિત્ર્યમથાષ્ટગન્ધૈરંગેષુ તેઽહં પ્રકરોમિ ચિત્રમ્ ।
પ્રસીદ ચિત્તેન વિનાયક ત્વં તતઃ સુરક્તં રવિમેવ ભાલે ॥ ૩૯॥

ધૃતેન વૈ કુંકુમકેન રક્તાન્ સુતંડુલાંસ્તે પરિકલ્પયામિ ।
ભાલે ગણાધ્યક્ષ ગૃહાણ પાહિ ભક્તાન્ સુભક્તિપ્રિય દીનબન્ધો ॥ ૪૦॥

ગૃહાણ ભો ચમ્પકમાલતીનિ જલપંકજાનિ સ્થલપંકજાનિ ।
ચિત્તેન દત્તાનિ ચ મલ્લિકાદિ પુષ્પાણિ નાનાવિધવૃક્ષજાનિ ॥ ૪૧॥

પુષ્પોપરિ ત્વં મનસા ગૃહાણ હેરમ્બ મન્દારશમીદલાનિ ।
મયા સુચિત્તેન ચ કલ્પિતાનિ હ્યપારકાણિ પ્રણવાકૃતે તુ ॥ ૪૨॥

દૂર્વાંકુરાન્ વૈ મનસા પ્રદત્તાંસ્ત્રિપંચપત્રૈર્યુતકાંશ્ચ સ્નિગ્ધાન ।

ગૃહાણ વિઘ્નેશ્વર સંખ્યયા ત્વં હીનાશ્ચ સર્વોપરિ વક્રતુણ્ડ ॥ ૪૩ ॥

દશાંગભૂતં મનસા મયા તે ધૂપં પ્રદત્તં ગણરાજ ઢુણ્ઢે ।
ગૃહાણ સૌરભ્યકરં પરેશ સિદ્ધ્યા ચ બુદ્ધ્યા સહ ભક્તપાલ ॥ ૪૪॥

દીપં સુવર્ત્યા યુતમાદરાત્તે દત્તં મયા માનસકં ગણેશ ।
ગૃહાણ નાનાવિધજં ઘૃતાદિ-તૈલાદિ-સંભૂતમમોઘદૃષ્ટે ॥ ૪૫॥

ભોજ્યં ચ લેહ્યં ગણરાજ પેયં ચોષ્યં ચ નાનાવિધ-ષડ્રસાઢ્યમ્ ।
ગૃહાણ નૈવેદ્યમથો મયા તે સુકલ્પિતં પુષ્ટિપતે મહાત્મન્ ॥ ૪૬॥

સુવાસિતં ભોજનમધ્યભાગે જલં મયા દત્તમથો ગૃહાણ ।
કમણ્ડલુસ્થં મનસા ગણેશ પિબસ્વ વિશ્વાદિકતૃપ્તિકારિન્ ॥ ૪૭॥

તતઃ કરોદ્વર્તનકં ગૃહાણ સૌગન્ધ્યયુક્તં મુખમાર્જનાય ।
સુવાસિતેનૈવ સુતીર્થજેન સુકલ્પિતં નાથ ગૃહાણ ઢુણ્ઢે ॥ ૪૮॥

પુનસ્તથાચમ્ય સુવાસિતં ચ દત્તં મયા તીર્થજલં પિબસ્વ ।
પ્રકલ્પ્ય વિઘ્નેશ તતઃ પરં તે સમ્પ્રોંછનં હસ્તમુખેકરોમિ ॥ ૪૯॥

દ્રાક્ષાદિ-રમ્ભાફલ-ચૂતકાનિ ખાર્જૂર-કાર્કન્ધુક-દાડિમાનિ ।
સુસ્વાદયુક્તાનિ મયા પ્રકલ્પ્ય ગૃહાણ દત્તાનિ ફલાનિ ઢુણ્ઢે ॥ ૫૦॥

પુનર્જલેનૈવ કરાદિકં તે સંક્ષાલયેઽહં મનસા ગણેશ ।
સુવાસિતં તોયમથો પિબસ્વ મયા પ્રદત્તં મનસા પરેશ ॥ ૫૧॥

અષ્ટાંગયુક્તં ગણનાથ દત્તં તામ્બૂલકં તે મનસા મયા વૈ ।
ગૃહાણ વિઘ્નેશ્વર ભાવયુક્તં સદાસકૃત્તુણ્ડવિશોધનાર્થમ્ ॥ ૫૨॥

તતો મયા કલ્પિતકે ગણેશ મહાસને રત્નસુવર્ણયુક્તે ।
મન્દારકૂર્પાસકયુક્ત-વસ્ત્રૈરનર્ઘ્ય-સંછાદિતકે પ્રસીદ ॥ ૫૩ ॥

તતસ્ત્વદીયાવરણં પરેશ સમ્પૂજયેઽહં મનસા યથાવત્ ।
નાનોપચારૈઃ પરમપ્રિયૈસ્તુ ત્વત્પ્રીતિકામાર્થમનાથબન્ધો ॥ ૫૪॥

ગૃહાણ લમ્બોદર દક્ષિણાં તે હ્યસંખ્યભૂતાં મનસા પ્રદત્તામ્ ।
સૌવર્ણ-મુદ્રાદિક-મુખ્યભાવાં, પાહિ પ્રભો વિશ્વમિદં ગણેશ ॥। ૫૫॥

રાજોપચારાન્ વિવિધાન્ ગૃહાણ હસ્ત્યશ્વ-છત્રાદિકમાદરાદ્વૈ ।
ચિત્તેન દત્તાન્ ગણનાથ ઢુણ્ઢે હ્યપારસખ્યાન્ સ્થિરજંગમાંસ્તે ॥ ૫૬॥

દાનાય નાનાવિધરૂપકાંસ્તે ગૃહાણ દત્તાન્ મનસા મયા વૈ ।
પદાર્થભૂતાન્ સ્થિર-જંગમાંશ્ચ હેરમ્બ માં તારય મોહભાવાત્ ॥ ૫૭॥

મન્દારપુષ્પાણિ શમીદલાનિ દૂર્વાંકુરાંસ્તે મનસા દદામિ ।
હેરમ્બ લમ્બોદર દીનપાલ ગૃહાણ ભક્તં કુરુ માં પદે તે ॥ ૫૮॥

તતો હરિદ્રામબિરં ગુલાલં સિંદૂરકં તે પરિકલ્પયામિ ।
સુવાસિતં વસ્તુસુવાસભૂતૈર્ગૃહાણ બ્રહ્મેશ્વર-શોભનાર્થમ્ ॥ ૫૯॥

તતઃ શુકાદ્યાઃ શિવ-વિષ્ણુમુખ્યા ઇન્દ્રાદયઃ શેષમુખાસ્તથાઽન્યે ।
મુનીન્દ્રકાઃ સેવકભાવયુક્તાઃ સભાસનસ્થં પ્રણમન્તિ ઢુણ્ઢિમ્ ॥ ૬૦॥

વામાંગકે શક્તિયુતા ગણેશં સિદ્ધિસ્તુ નાનાવિધસિદ્ધિ ભિસ્તમ્ ।
અત્યન્તભાવેન સુસેવતે તુ માયાસ્વરૂપા પરમાર્થભૂતા ॥ ૬૧॥

ગણેશ્વર દક્ષિણભાગસંસ્થા બુદ્ધિઃ કલાભિશ્ચ સુબોધિકાભિઃ ।
વિદ્યાભિરેવં ભજતે પરેશા માયાસુ સાંખ્યપ્રદચિત્તરૂપા ॥ ૬૨॥

પ્રમોદમોદાદયઃ પૃષ્ઠભાગે ગણેશ્વરં ભાવયુતા ભજન્તે ।
ભક્તેશ્વરા મુદ્ગલશમ્ભુમુખ્યાઃ શુકાદયસ્તં સ્મ પુરો ભજન્તે ॥ ૬૩॥

ગન્ધર્વમુખ્યા મધુરં જગુશ્ચ ગણેશગીતં વિવિધસ્વરૂપમ્ ।
નૃત્યંકલાયુક્તમથો પુરસ્તાચ્ચક્રુસ્તથા હ્યસરસો વિચિત્રમ્ ॥ ૬૪॥

ઇત્યાદિ-નાનાવિધ-ભાવયુક્તૈઃ સંસેવિતં વિઘ્નપતિં ભજામિ ।
ચિત્તેન ધ્યાત્વા તુ નિરંજનં વૈ કરોમિ નાનાવિધદીપયુક્તમ્ ॥ ૬૫॥

ચતુર્ભુજં પાશધરં ગણેશં તથાંકુશં દન્તયુતં તમેવમ્ ।
ત્રિનેત્રયુક્તં ત્વભયંકરં તં મહોદરં ચૈકરદં ગજાસ્યમ્ ॥ ૬૬॥

સર્પોપવીતં ગજકર્ણધારં વિભૂતિભિઃ સેવિતપાદપદ્મમ્ ।
ધ્યાયે ગણેશં વિવિધપ્રકારૈઃ સુપૂજિતં શક્તિયુતં પરેશમ્ ॥ ૬૭॥

તતો જપં વૈ મનસા કરોમિ સ્વમૂલમન્ત્રસ્ય વિધાનયુક્તમ્ ।
અસંખ્યભૂતં ગણરાજહસ્તે સમર્પયામ્યેવ ગૃહાણ ઢુણ્ઢે ॥ ૬૮॥

આરાર્તિકા કર્પુરકાદિભૂતામપારદીપાં પ્રકરોમિ પૂર્ણામ્ ।
ચિત્તેન લમ્બોદર તાં ગૃહાણ હ્યજ્ઞાનધ્વાન્તૌઘહરાં નિજાનામ્ ॥ ૬૯॥

વેદેષુ વૈઘ્નેશ્વરકૈઃ સુમન્ત્રૈઃ સુમન્ત્રિતં પુષ્પદલં પ્રભૂતમ્ ।
ગૃહાણ ચિત્તીન મયા પ્રદત્તમપારવૃત્ત્યા ત્વથ મન્ત્રપુષ્પમ્ ॥ ૭૦॥

અપારવૃત્યા સ્તુતિમેકદન્તં ગૃહાણ ચિત્તેન કૃતાં ગણેશ ।
યુક્તાં શ્રુતિસ્માર્તભવૈઃ પુરાણૈઃ સર્વૈઃ પરેશાધિપતે મયા તે ॥ ૭૧॥

પ્રદક્ષિણા માનસકલ્પિતાસ્તા ગૃહાણ લમ્બોદર ભાવયુક્તાઃ ।
સંખ્યાવિહીના વિવિધસ્વરૂપા ભક્તાન્ સદા રક્ષ ભવાર્ણવાદ્વૈ ॥ ૭૨॥

નતિં તતો વિઘ્નપતે ગૃહાણ સાષ્ટાંગકાદ્યાં વિવિધસ્વરૂપામ્ ।
સંખ્યાવિહીનાં મનસા કૃતાં તે સિદ્ધ્યા ચ બુદ્ધ્યા પરિપાલયાશુ ॥ ૭૩ ॥

ન્યૂનાતિરિક્તં તુ મયા કૃતં ચેત્તદર્થમન્તે મનસા ગૃહાણ ।
દૂર્વાંકુરાન વિઘ્નપતે પ્રદત્તાન્ સમ્પૂર્ણમેવં કુરુ પૂજનં મે ॥ ૭૪॥

ક્ષમસ્વ વિઘ્નાધિપતે મદીયાન્ સદાપરાધાન્ વિવિધસ્વરૂપાન્ ।
ભક્તિં મદીયાં સફલાં કુરુષ્વ સમ્પ્રાર્થયેઽહં મનસા ગણેશ ॥ ૭૫॥

તતઃ પ્રસન્નેન ગજાનેન દત્તં પ્રસાદં શિરસાઽભિવન્દ્ય ।
સ્વમસ્તકે તં પરિધારયામિ ચિત્તેન વિઘ્નેશ્વરમાનતોઽસ્મિ ॥ ૭૬॥

ઉત્થાય વિઘ્નેશ્વર એવ તસ્માદ્ગતસ્તતસ્ત્વન્તરધાનશક્ત્યા ।
શિવાદયસ્તં પ્રણિપત્ય સર્વે ગતાઃ સુચિત્તેન ચ ચિન્તયામિ ॥ ૭૭॥

સર્વાન્નમસ્કૃત્ય તતોઽહમેવ ભજામિ ચિત્તેન ગણાધિપં તમ્ ।
સ્વસ્થાનમાગત્ય મહાનુભાવૈર્ભક્તૈર્ગણેશસ્ય ચ ખેલયામિ ॥ ૭૮॥

એવં ત્રિકાલેષુ ગણાધિપં તં ચિત્તેન નિત્યં પરિપૂજયામિ ।
તેનૈવ તુષ્ટઃ પ્રદદાતુ ભાવં વિઘ્નેશ્વરો ભક્તિમયં તુ મહ્યમ્ ॥ ૭૯॥

ગણેશપાદોદકપાનકં ચ ઉચ્છિષ્ટગંધસ્ય સુલેપનં તુ ।
નિર્માલ્ય-સન્ધારણકં સુભોજ્યં લમ્બોદરસ્યાસ્તુ હિ ભુક્તશેષમ્ ॥ ૮૦॥

યં યં કરોમ્યેવ તદેવ દીક્ષા ગણેશ્વરસ્યાસ્તુ સદા ગણેશ ।
પ્રસીદ નિત્યં તવપાદભક્તં કુરુષ્વ માં બ્રહ્મપતે દયાલો ॥ ૮૧॥

તતસ્તુ શય્યાં પરિકલ્પયામિ મન્દાર-કૂર્પાસક-વસ્ત્રયુક્તામ્ ।
સુવાસ-પુષ્પાદિભિરર્ચિતાં તે ગૃહાણ નિદ્રાં કુરુ વિઘ્નરાજ ॥ ૮૨॥

સિદ્ધ્યા ચ બુદ્ધ્યા સહિતં ગણેશ સુનિદ્રિતં વીક્ષ્ય તથાઽહમેવ ।
ગત્વા સ્વવાસં ચ કરોમિ નિદ્રાં ધ્યાત્વા હૃદિ બ્રહ્મપતિં તદીયઃ ॥ ૮૩ ॥

એતાદૃશં સૌખ્યમમોઘશક્તે દેહિ પ્રભો માનસજં ગણેશ ।
મહ્યં ચ તેનૈવ કૃતાર્થરૂપો ભવામિ ભક્ત્યમૃતલાલસોઽહમ્ ॥ ૮૪॥

ગાર્ગ્ય ઉવાચ ॥

એવં નિત્યં મહારાજ ગૃત્સમાદો મહાયશાઃ ।
ચકાર માનસીં પૂજાં યોગીન્દ્રાણાં ગુરુઃ સ્વયમ્ ॥ ૮૫॥

ય એતાં માનસીં પૂજાં કરિષ્યતિ નરોત્તમઃ ।
પઠિષ્યતિ સદા સોઽપિ ગાણપત્યો ભવિષ્યતિ ॥ ૮૬॥

શ્રાવયિષ્યતિ યો મર્ત્યઃ શ્રોષ્યતે ભાવસંયુતઃ ।

સ ક્રમેણ મહીપાલ બ્રહ્મભૂતો ભવિષ્યતિ ॥ ૮૭॥

યદ્યદિચ્છતિ તત્તદ્વૈ સફલં તસ્ય જાયતે ।
અન્તે સ્વાનન્દગઃ સોઽપિ યોગિવન્દ્યો ભવિષ્યતિ ॥ ૮૮॥

ઇતિ શ્રીમદાન્ત્યે મુદ્ગલપુરાણે ગણેશમાનસપૂજા સમાપ્તા ॥

proofread by Karthik Chandan.P (kardan5380@yahoo.com)
Amith K Nagaraj (amithkn@rediffmail.com)

.. shrIgaNeshamAnasapUjA ..
was typeset on August 2, 2016

Please send corrections to sanskrit@cheerful.com